Roll No. ...................................

# D–3476

## M. A. (Final) EXAMINATION, 2020

SANSKRIT

Paper Eighth

(साहित्यसिद्धान्त)

*Time : Three Hours* ] [ *Maximum Marks : 100*

**सूचना** : सर्वे प्रश्नाः समाधेयाः।

1. अधस्तनेषु केऽपि **द्वे** कारिके व्याख्येये— 20

   (i) धर्मादि साधनोपायः सुकुमार क्रमोदितः।
   काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥

   (ii) शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
   बन्धे व्यस्थितौ काव्यं तद्विदाह्लादकारिणि॥

   (iii) साहित्यमनयोः शोभा, शालितां प्रति काव्यसौ।
   अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितः॥

   (iv) सुकुमाराभिधः सोऽयं येन सत्कवयो गताः।
   मार्गेसोत्फुल्ल कुसुमकाननेनेव षट्पदाः॥

2. भाक्तवादिनां मतं निरस्य ध्वनिस्वरूपं साधु निरूपयत। 20





अथवा

केऽपि **द्वे** कारिके व्याख्येये—

(i) योऽर्थः सहृदय श्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥

(ii) सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति, परिस्फुरन्तं प्रतिभाविशेषम्॥

(iii) यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः, स ध्वनिरिति सूरिभिः कथितः॥

3. (क) काव्यपुरुषोत्पत्ति व्युत्पत्तिविपाकयोरेकतरस्य सारांशो लेख्यः। 10

   (ख) अधस्तनेषु कमपि **द्वयं** सप्रसङ्गं व्याख्यायताम्— 10

   (i) द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
   तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥

   (ii) परिक्रिया पुराकल्प इतिहास गतिर्द्विधा।
   स्यादेकनायका पूर्वा द्वितीयाबहुनायका॥

   (iii) चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तांसोऽस्य।
   त्रिधा वद्धोवृषभो रोदवीति, महो देवो मर्त्यानाविवेश॥

   (iv) सारस्वतः स्वतन्त्रः स्याद्भवेदाभ्यासिको मितः।
   औपदेश कविस्त्वत्र वल्गु फल्गु च जल्पति॥

4. केषाञ्चिच्चतुर्णां व्याख्या विधेया— 20

(i) वाक्यौचित्यम्

(ii) अलङ्कारौचित्यम्

(iii) कारकौचित्यम्

(iv) कालौचित्यम्

(v) प्रतिभौचित्यम्

(vi) क्रियौचित्यम्।

5. रीतिरात्माकाव्यस्य सयुक्तिकं व्याख्यायताम्। 20

**अथवा**

अभिनवगुप्तदिशा रससिद्धान्तः वर्णनीयः।